इति मेदिनी ॥ (यथा, साहित्यदर्पणे । ३ परिच्छेदः । "अस्माकं सखि! वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं" ।
"विचित्रोज्ज्वलवेशा तु बलन्नूपुरनिःस्वना" ॥)

उज्ज्वलं, क्ली, (उत् + ज्वल + अच् ।) स्वर्णम् । इति राजनिर्घण्टः ॥

उज्ज्वलः, पुं, (उत् + ज्वल + अच् ।) शृङ्गाररसः । इत्यमरः ॥ (यथा, नैषधे १ । १ ।
"स राशिरासीन्महसां महोज्ज्वलः" ॥)

उज्झ श त्यागे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) औपध इत्येके । उजिज्झिषति । औजिज्झत् । श उज्झती उज्झन्ती । इति दुर्गादासः ॥ अन्यत् उद्झधातौ द्रष्टव्यम् ॥

उज्झः, पुं, (उज्झतीति । उज्झ + अच् ।) त्यागः । विसर्जनम् ।(यथा, मनुः ११।५६ ।
"ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः" ॥)

उज्झितं, त्रि,(उज्झ + क्त ।) उत्सृष्टम् । त्यक्तम् । वर्जितं । इति हलायुधः ॥ (यथा किराते । ५ । ६ ।
"अविरतोज्झितवारिविपाण्डुभिः" ।
"उज्झितायास्त्वया नाथ ! तदैव मरणं वरम्" ॥
इति रामायणे २ । ३० । २० ॥)

उञ्छं, क्ली, (उछि + घञ् ।) पतितधान्यादानवत् शस्यग्रहणं । यथा । उपात्तशस्यात् क्षेत्रात् शेषावचयने । उञ्छेन पतितधान्यादानवद्ग्रहणेन शिल्यते सञ्चीयते उञ्छशिलं उछि उञ्छे शिल उञ्छे क्सडोरित्युक्तेः छात्त्रेति इगुपधत्वात् कः उञ्छशिलम् । संघातं विगृहीतं विपर्य्यस्तञ्च नाम । "शक्या न चेदुञ्छशिलेन वृत्तिः । फलेन मूलेन च वारिणा च" इति । समाहारद्वन्द्वे उञ्छं शिलञ्च । उञ्छं भैक्षञ्च यच्चान्यत्तत् परिग्रहणान्तु ऋतम् । इति निगमाभिधाने क्लीवम् । पुमानुञ्छऋतशिलं इति वोपालिते पुंस्युञ्छः । भवभूतिकृतशिलोञ्छे इति गोवर्द्धनः । केचिदुञ्छशिलयोर्भेदमाहुः । "प्रतिग्रहात् शिलं श्रेयस्ततोऽप्युञ्छः प्रशस्यते" । इति तत्र शाल्यादेर्निपातितपरित्यक्तमञ्जरीणां आदानं शिलं । शिलं धान्यमञ्जरीसंग्रहः । इति स्वामी च । एकैकशः कपोतवद्धान्यकणोद्ग्रहणमुञ्छः । तदुक्तं उञ्छो धान्यकणोच्चय इति । शिलं ताम्बूलादि दन्त्यादि च । धर्म्मात्वात् सत्यमिति ऋतम् । इति उञ्छशिलशब्दटीकायां भरतः ॥

उञ्छः, पुं, (उछि उञ्छे + घञ् ।) उञ्छशिलम् । इति जटाधरः ॥ (यथा, रामायणे । २।२४।२।
"मयि जातो दशरथात् कथमुञ्छेन वर्त्तयेत्" ॥)

उञ्छनं, क्ली, (उछि + ल्युट् ।) आपणादिपतितकणोपादानम् । इति श्रीभागवतम् ॥ उञ्छन खुँटिया लओन चुनिया लओन कुड़ाइया लओन इत्यादि भाषा ॥

उञ्छशिलं, क्ली, (उञ्छश्च शीलश्च तयोरेकवद्भावः ।) उञ्छवृत्तिः । सा तु गृहीतशस्यक्षेत्रात् शेषावचयनम् । तत्पर्य्यायः । ऋतं २ । इत्यमरः ॥ ईर्क्षालिशं ३ उञ्छः ४ उञ्छं ५ शिलं ६ । इति तट्टीका ॥ (यथा, मनुः । ४।५ ।
"ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्" ॥)

उञ्छशीलः, त्रि, (उञ्छः शीलं वृत्तं यस्य ।) उञ्छजीवी । उद्धृतशस्यस्य शेषाहरणकर्त्ता । इति पुराणम् ॥ कुड़ाने इति भाषा ॥

उटः, पुं, तृणपर्णादिः । इत्यमरटीकायां भरतः ॥

उटजः, पुं, क्ली, (उटास्तृणपर्णादयस्तेभ्योजायते इति । उट + जन + ड ।) मुनीनां पत्ररचितगृहम् । तत्पर्य्यायः । पर्णशाला २ । इत्यमरः ॥ पर्णोटजः ३ । इति शब्दरत्नावली ॥ यथा रघुः ।
('आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः' । १।५० ।
'मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु" । १ । ५२ ।) गृहमात्रम् । इत्यमरमाला ॥

उठ उपघाते । (भ्वादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ ऋखादिः । ओठति खलः साधुम् । इति दुर्गादासः ॥

उड संहतौ । (परं-अकं-सेट् ।) सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ उड़ुपः । इति दुर्गादासः ॥

उडु, क्ली स्त्री, (उ रोषोक्तिपूर्व्वकं डयते इति । उ + डी + डु मितद्व्रादित्वात् डुः ।) नक्षत्रम् । इत्यमरः ॥ ("तदोडुराजः कुकुभः करैर्मुखम्" । इति भागवते । १०।२९।२ । तथा रघुवंशे । १६ । ६५ ।
"इन्दुप्रकाशान्तरितोडुतुल्याः" ।)
जले क्ली । इत्यमरटीकायां भरतः ॥

उड़ुपः, पुं क्ली, (उडुनो जलात् पाति रक्षतीति । उडु + पा + क ।) भेलकम् । भेला माड़ इत्यादि भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ । इत्यमरः ॥ भेलकः ४ उडूपः ५ तरणः ६ तारणः ७ तारकः ८ । इति शब्दरत्नावली ॥
("तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" ॥
इति रघुवंशे । १।२ ।) चन्द्रे पुं । इति मेदिनी ॥
("अपश्यत् वदनं तस्य रश्मिवन्तमिवोड़ुपम्" । इति महाभारते । वनपर्व्वणि ॥ चर्म्मावनद्धपानपात्रं । यथा,—
"चर्म्मावनद्धमुडुपं प्लवः काष्ठं करण्डवत्" ॥
इति सज्जनः ॥)

उड़ुपतिः, पुं, (उडूनां पतिः ।) चन्द्रः । इति पुराणज्योतिषे ॥ ("अयाचितोपस्थितमम्बु केवलं रसात्मकस्योड़ुपतेश्च रश्मयः" । इति कुमारे । ५।२२ ।
"परिमुग्धतां वणिगिवोड़ुपतेः" । इति माघे ।)

उड़ुपथः, पुं, (उडूनां पन्थाः ।) आकाशम् । इति हेमचन्द्रः ॥

उड़ुम्बरं, क्ली,(उडुं वृणातीति । उडु + वृ + अच् ।) ताम्रम् । इति मेदिनी ॥ ("ताम्रं शुल्वमुडुम्बरम्" । इति वैद्यकरत्नमाला । कर्षार्थे यथा,—
"उडुम्बरस्य पर्य्यायैः कर्षएव निगद्यते" ॥
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमाध्यायः ।) कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

उड़ुम्बरः, पुं, (उडु + वृ + अच् ।) उदुम्बरवृक्षः । यज्ञडुमुर इति भाषा । तत्पर्य्यायः । जन्तुफलः २ यज्ञाङ्गः ३ हेमदुग्धकः ४ । इत्यमरः ॥ ब्रह्मवृक्षः ५ । इति रत्नमाला ॥ हेमदुग्धी ६ यज्ञफलः ७ यज्ञोडुम्बरः ८ । इति शब्दरत्नावली ॥ सदाफलः ९ क्षीरवृक्षः १० सुचक्षुः ११ श्वेतवल्कलः १२ । इति जटाधरः ॥ अस्य गुणाः । उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रनुत् । मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥ इति भावप्रकाशः ॥
("उडुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम् ।
संलिहेन्मधुना सर्व्वमनुपानं सुखावहम्" ॥
इति वैद्यक रसेन्द्रसारसंग्रहे मूत्राघाताधिकारे ।) अन्यत् उदुम्बरशब्दे द्रष्टव्यम् ॥ देहली । गोवराटेर निचेर काठ इति भाषा । षण्ढम् । नपुंसकमिति यावत् । कुष्ठरोगभेदः । इति मेदिनी ॥

उड़ुम्बरपर्णी, स्त्री, (उडुम्बरस्य पर्णमिव पर्णं यस्याः ।) दन्तीवृक्षः । इति शब्दचन्द्रिका । (उदुम्बरपर्णीशब्दे ऽस्या विशेषो ज्ञेयः ॥)

उड़ूपः, पुं क्ली, (उडुपशब्देऽस्य व्युत्पत्तिर्ज्ञेया ।) उडुपः । भेला इति भाषा । चन्द्रे पुं । इति द्विरूपकोषः ॥

उड्डयनं, क्ली, (उत् + डी + ल्युट् ।) नभोगतिः । ओड़ा इति भाषा । यथा नैषधे १ । १२५ ॥
"गतो विहस्योड्डयने निराशताम्" ॥
("सोऽपि तमादाय सम्पातोड्डयनेन प्रस्थितः" । इति पञ्चतन्त्रे ॥)

उड्डामरं, त्रि, (उत्कृष्टः डामरः ।) श्रेष्ठम् । तत्पर्य्यायः । उद्भटं २ उत्तालम् ३ । इति त्रिकाण्डशेषः ॥ (पुं तन्त्रविशेषः ॥)

उड्डीनं, क्ली, (उत् + डी + क्त ।) खगगतिक्रिया । पक्षिणां ऊर्द्ध्वगमनम् । इत्यमरः ॥
("अहं सम्पातादिकानष्टानुड्डीनगतिविशेषान् वेद्मि" । इति पञ्चतन्त्रे ॥)

उड्डीयमानः, त्रि, (उत् + डी + शानच् ।) उड्डयनविशिष्टपक्ष्यादिः । उड़न्त ओड़्ता इत्यादि भाषा ॥

उड्डीशः, पुं, (उत् + डी + श । यद्वा उड्डानां उत्पथगामिनां योगिनामित्यर्थः ईशः महादेवस्य योगीश्वरत्वात् ।) आगमशास्त्रविशेषः । शिवः । इति मेदिनी ॥

उत्, व्य, प्रश्नः । वितर्कः । इति मेदिनी ॥ अत्यर्थं । सन्देहः । इति शब्दरत्नावली ॥ (ऊर्द्धम् । अप्यर्थे ॥)

उत व्य, (उ शब्दे + क्त ।) अत्यर्थम् । विकल्पः । समुच्चयः । वितर्कः । प्रश्नः । पादपूरणम् । इति मेदिनी ॥ (अप्यर्थे । एवार्थे । "किमेतदारण्यं उत ग्राम्यम्" । इति पञ्चतन्त्रे । "तत्किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते" । इति शाकुन्तले । "वीरो रसः किमयमित्युत दर्प एषः" । इति उत्तरचरिते ॥)

उतं, त्रि, (वे + क्त । यजादित्वात् सम्प्रसारणम् ।) तन्तुसन्तानः । बोना इति भाषा । तत्पर्य्यायः । ऊतं २ स्यूतम् ३ । इत्यमरः ॥

उतथ्य, पुं, मुनिविशेषः । स च अङ्गिरःपुत्रः । इति पुराणम् ॥
("त्रयस्त्वङ्गिरसः पुत्रा लोके सर्व्वत्र विश्रुताः ।
वृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रताः" ॥
इति महाभारते आदिपर्व्वणि ॥)